तत्पर्य्यायः। हस्तपर्णी २ श्वेतपुष्पा ३ महासिता ४ महाश्वेतघण्टी ५ महाश्वेता ६। अस्या गुणाः। कषायत्वम्। उष्णत्वम्। शस्तत्वम्। रसनियामकत्वम्। कुतूहलमोहनस्तम्भनादिषु प्रोक्तत्वञ्च। इति राजनिर्घण्टः॥

महाशता, स्त्री, ( महत् शतञ्च मूलानि यस्याः। टाप्।) महाशतावरी। इति राजनिर्घण्टः॥

महाशतावरी, स्त्री, ( महती चासौ शतावरी चेति।) वृहच्छतावरी। तत्पर्य्यायः। शतवीर्य्या २ सहस्रवीर्य्या ३ सुरसा ४ महापुरुषदन्तिका ५ वीरा ६ तुङ्गिनी ७ बहुपुत्त्रिका ८ ऊर्द्धकण्टी ९ महावीर्य्या १० फणिजिह्वा ११ महाशता १२ सुवीर्य्या १३। अस्या गुणाः। वश्यत्वम्। मधुरत्वम्। पित्तनाशित्वम्। हिमत्वम्। मेहकफवातघ्नत्वम्। तिक्तत्वम्। श्रेष्ठत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"महाशतावरी त्वन्या शतमूल्यूर्द्धकण्टिका।
सहस्रवीर्य्या हेतुश्च ऋष्यप्रोक्ता महोदरी॥
महाशतावरी मेध्या हृद्या वृष्या रसायनी।
शतवीर्य्या निहन्त्यर्शोग्रहणीनयनामयान्॥"
इति भावप्रकाशः॥

महाशयः, त्रि, महान् आशयोऽभिप्रायो मनो वा यस्य सः। इति भरतः॥ तत्पर्य्यायः। महेच्छः २। इत्यमरः। ३। १। ३॥ महानुभावः ३। इति शब्दरत्नावली॥ उदात्तः ४ महामनाः ५। इति जटाधरः॥ उद्भटः ६ उदारः ७ उदीर्णः ८ महात्मा ९। इति हेमचन्द्रः। ३। १३१॥ ( यथा, कथासरित्सागरे। ७२। १२८।

"दैवात्प्रबुद्धः शुश्राव स वराहो महाशयः॥"

महान् आशयो जलानामाधारः।) समुद्रे, पुं। इति शब्दरत्नावली॥

महाशय्या, स्त्री, ( महती चासौ शय्या चेति।) राजशय्या। इति हेमचन्द्रः। ३। ३८०॥ वृहच्छय्या च॥

महाशरः, पुं, ( महांश्चासौ शरश्चेति।) स्थूलशरः। इति राजनिर्घण्टः॥

महाशल्कः, पुं, ( महान् वृहन् शल्को यस्य।) चिङ्गटमत्स्यः। इति हारावली। १८७॥ (यथा, मनुः। ३। २७२।

"कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्व्वशः॥"

(महान् शल्कः।) वृहच्छल्कश्च। तद्युक्ते, त्रि॥

महाशाकं, क्ली, ( महच्च तत् शाकञ्च।) वृहच्छाकविशेषः। इति केचित्॥

महाशाखा, स्त्री, ( महती शाखा यस्याः।) नागबला। इति राजनिर्घण्टः॥

महाशालिः, पुं, ( महांश्चासौ शालिश्च।) स्थूलशालिः। इति राजनिर्घण्टः॥ तत्पर्य्यायः। सुगन्धिकः २। इति हेमचन्द्रः। ४। २४५॥ ( स च धान्यविशेषः। तद्यथा,—

"रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः।
सुगन्धकः कर्द्दमको महाशालिश्च दूषकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महाशिवः, पुं, (महांश्चासौ शिवकल्याणरूपी च।) महादेवः। यथा,—

"रत्नसिंहासनस्थञ्च महाभूषणभूषितम्।
महाशिवं शिवकरं शिवबीजं शिवाश्रयम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे २९ अध्यायः॥

महाशीता, स्त्री, (महत्यधिका शीता शीतवीर्य्या।) शतमूली। इति शब्दचन्द्रिका॥ (महत् शीतं शीतगुणोऽस्य।) अतिशीतवीर्य्ययुक्ते, त्रि॥

महाशुक्तिः, स्त्री, ( महती शुक्तिः। मुक्ताकरत्वेनास्या महत्वम्।) मुक्तामाता। सा च शुक्तिः। इति राजनिर्घण्टः॥ ( महती स्थूला शुक्तिः।) वृहच्छुक्तिश्च॥

महाशुक्ला, स्त्री, ( महती चासौ शुक्ला शुक्लवर्णा च।) सरस्वती। इति भूरिप्रयोगः॥ अतिशुक्लवर्णयुक्ते, त्रि॥

महाशुभ्रं, क्ली, ( महान् शुभ्रो वर्णोऽस्य।) रजतम्। इति राजनिर्घण्टः॥ अतिशुभ्रवर्णयुक्ते, त्रि॥

महाशूद्रः, पुं, ( महान् शूद्रः।) आभीरः। इति महाशूद्रीशब्ददर्शनात्॥

महाशूद्री, स्त्री, ( महाशूद्रस्य भार्य्या इति। "अजाद्यतष्टाप्।" ४। १। ४। इत्यत्र। "महत्पूर्व्वस्य प्रतिषेधः।" इति काशिकोक्त्या पुंयोगलक्षणा ङीष्।) आभीरी। इत्यमरः। २। ६। १३॥

महाशौण्डी, स्त्री, (महती चासौ शौण्डी च।) श्वेतकिणिहीवृक्षः। इति राजनिर्घण्टः॥

महाश्मशानं, क्ली, (महच्च तत् श्मशानञ्च। अत्र हि जीवानां मरणे समस्तकर्म्मनाशतः पुनर्जन्ममरणाद्यभावादस्यास्तथात्वम्।) काशी। इति काशीखण्डम्॥

महाश्यामा, स्त्री, ( महती चासौ श्यामा च।) श्यामालता। इति रत्नमाला॥ शिंशपावृक्षः। इति राजनिर्घण्टः॥ ( यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये। "श्यामामहाश्यामामाहटवहन्तीत्यादि॥" वृक्षपादिवृक्षः। तत्पर्य्यायो यथा,—

"कण्टकाख्या महाश्यामा वृक्षपादीति
वक्ष्यते॥"

इति गारुड़े २०८ अध्याये॥)

महाश्रमणः, पुं, (महान् श्रेष्ठश्चासौ श्रमणो बौद्धभिक्षुश्चेति।) बुद्धविशेषः। स च शाक्यमुनिः। तत्पर्य्यायः। सर्व्वार्थसिद्धः २ कुलिशासनः ३ गोपेशः ४। इति हेमचन्द्रः॥

महाश्रावणिका, स्त्री, ( महती चासौ श्रावणिका च।) क्षुपविशेषः। वड़ मुलकुड़ी इति भाषा। तत्पर्य्यायः। महामुण्डी २ लोचनी ३ कदम्बपुष्पी ४ विकचा ५ क्रोड़ा ६ चोड़ा ७ पलङ्कषा ८ नदीकदम्बः ९ मुण्डाख्या १० महामुण्डनिका ११ माता १२ स्थविरा १३ लोमशा १४ भूकदम्बः १५ अलम्बुषा १६। अस्य गुणाः। उष्णत्वम्। तिक्तत्वम्। ईषन्मधुरत्वम्। वायुशमनत्वम्। स्वरशस्तत्वम्। रेचनत्वम्। हेमन्तत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"मुण्डी भिक्षुरपि प्रोक्ता श्रावणी च तपोधना।
श्रवणाह्वा मुण्डितिका तथा श्रवणशीर्षिका॥
महाश्रावणिकाख्या तु सा स्मृता भूकदम्बिका।
कदम्बपुष्पिका च स्यादव्यथा तु तपस्विनी॥
मुण्डितिका कटुः पाके वीर्य्योष्णा मधुरा लघुः।
मेध्या गण्डापचीकृच्छ्रक्रिमियोन्यर्त्तिपाण्डुनुत्॥
श्लीपदारुच्यपस्मारप्लीहमेदोगुदार्त्तिहृत्।
महामुण्डी च मुण्डी च गुणैरुक्ता महर्षिभिः॥"
इति भावप्रकाशः॥

महाश्रीः, स्त्री, ( महती श्रीरिव।) बुद्धशक्तिविशेषः। तत्पर्य्यायः। तारा २ आर्य्यतारा ३ स्वाहा ४ श्रीः ५ मनोरमा ६ तारिणी ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥

महाश्वेता, स्त्री, ( महत्यतिशया श्वेता। महान् श्वेतो वर्णो यस्या वा।) सरस्वती। इति त्रिकाण्डशेषः॥ कृष्णभूमिकुष्माण्डः। तत्पर्य्यायः। क्षीरविदारी २ ऋष्यगन्धिका ३। इत्यमरः। २। ४। ११०॥ क्षीरविदारिका ४ क्षीरवल्ली ५ क्षीरकन्दा ६। इति जटाधरः॥ क्षीरिका ७। इति शब्दरत्नावली॥ श्वेतापराजिता। इति रत्नमाला॥ ( पर्य्यायोऽस्या यथा,—

"गिरिकर्णी महाश्वेता स्थूलपुष्पा सिता
क्वचित्॥"

इति वैद्यकरत्नमालायाम्॥)

सिता। तत्पर्य्यायः। मधुजा २। इति त्रिकाण्डशेषः॥ श्वेतकिणिहीवृक्षः। इति राजनिर्घण्टः॥ ( पर्य्यायोऽस्या यथा,—

"कटभी किणिही श्वेता महाश्वेता च
रोहिणी॥")

दुर्गा। यथा, देवीपुराणे ४५ अध्याये।

"श्वेतं शुक्लं शिवस्थानं यस्माच्चेह समागता।
महाभावसमुत्पन्ना महाश्वेता ततः स्मृता॥"

( किम्पुरुषवर्षस्थितहंसनामकगन्धर्व्वराजस्य गौरीगर्भोत्पन्ना कन्या। तत्कथा कादम्बर्य्यां विस्तरशो द्रष्टव्या॥)

महाषष्ठी, स्त्री, ( महती चासौ षष्ठी च। महामङ्गलदात्री षष्ठी वा।) दुर्गा। यथा, ॐ दुं दुं दुं दुर्गे दुर्गे नाशय नाशय हन हन दह दह मथ मथ वधवधसर्व्वहिंसान् महाषष्ठीरूपेण बालकं रक्ष रक्ष चिरजीविनं कुरु कुरु श्रीं ह्रीं हूं फट् स्वाहा।" इति योगिनीतन्त्रे महाषष्ठीकवचम्॥